# Shri Alakharamacharyakrita Manavasamiksha

# શ્રીઅલખરામાચાર્યકૃતા માનવસમીક્ષા

## Document Information

Text title : Shri Alakharamacharyakrita Manavasamiksha

File name : mAnavasamIkShAalakharAmAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : alakharAmAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીઅલખરામાચાર્યકૃતા માનવસમીક્ષા

સીતારામૌ દયામૂર્તી મારુતિં ચ મહામતિમ્ ।
નમામ્યાચાર્યવર્યાંશ્ચ સ્વસ્ય ધર્મોપદેશકાન્ ॥ ૧॥

રામાનન્દં નમસ્કૃત્ય યોગાનન્દં ગુરું તથા ।
માનવાનાં સમીક્ષાં હિ કુર્વે સન્માર્ગદર્શિનીમ્ ॥ ૨॥

પરોપકરણં ધર્મં સન્તઃ શંસન્તિ સર્વદા ।
સુખમૂલં તદેવાસ્તિ વિધાતુશ્ચોપકારકમ્ ॥ ૩॥

અધર્મશ્ચાપકારો હિ સદા સદ્ભિર્વિગર્હિતઃ ।
દુઃખમૂલં નરસ્યાત્ર વિધાતુશ્ચાપકારકઃ ॥ ૪॥

અહમ્ભાવં પરિત્યજ્ય સ્વસ્યાહિતાન્ જનાનપિ ।
સન્તઃ સદોપકુર્વન્તિ વિસ્મૃત્ય સ્વહિતાહિતે ॥ ૫॥

વિરક્તો હિ ગૃહી ભૂત્વા ત્વારૂઢપતિતો ભવેત્ ।
પ્રાયશ્ચિત્તં નિકૃષ્ટસ્ય તસ્ય શાસ્ત્રે ન દૃશ્યતે ॥ ૬॥

ઉત્તમાઃ -

ઉત્તમાઃ સ્વપરસ્યાપિ ચાહિતસ્ય ન કારકાઃ ।
સ્વસ્ય તથા પરસ્યેહ માનવા હિતકારકાઃ ॥ ૭॥

અહિતે સત્યપિ સ્વસ્ય પરાહિતાવિધાયકાઃ ।
જાતેઽપિ સ્વાહિતે તદ્વત્ પરહિતસ્ય કારકાઃ ॥ ૮॥

મધ્યમાઃ -

મધ્યમાઃ સ્વહિતાયેહ પરહિતસ્ય કારકાઃ ।
સ્વસ્યાહિતાવિધાનાય પરહિતવિધાયકાઃ ॥ ૯॥

તસ્મૈ પ્રયોજનાયૈવ પરાહિતાવિધાયકાઃ ।
યે તેઽપિ મધ્યમા બોધ્યાઃ પુરુષાઃ પુરુષૈરિહ ॥ ૧૦॥

અધમાઃ -
પરાહિતં તુ કુર્યુર્યે સ્વહિતાય હિ તેઽધમાઃ ।
સ્વસ્યાહિતં ન ચેત્તર્હિ પરાહિતવિધાયકાઃ ॥ ૧૧॥

અધમતમાઃ -
સ્વસ્યાહિતેઽપિ યે લોકાઃ પરસ્યાહિતવિધાયકાઃ ।
સર્વેભ્યસ્તેઽધમા બોધ્યાશ્ચૈષ સાધુર્વિનિર્ણયઃ ॥ ૧૨॥

શ્રીઅલખરામાચાર્ય દ્વારપીઠાર્યનિર્મિતા ।
માનવાનાં સમીક્ષેયં ભૂયાત્ સન્માર્ગદર્શિકા ॥ ૧૩॥

ઇતિ શ્રીઅલખરામાચાર્યકૃતા માનવ-સમીક્ષા સમ્પૂર્ણા ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Alakharamacharyakrita Manavasamiksha*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*